Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# मनुस्मृतौ परिवेशविज्ञानम्

**डा.सुधांशुशेखरमहापात्रः**
सहाचार्यः, धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**Article Info**
Volume 5, Issue 3
Page Number : 37-40

**Publication Issue :**
May-June-2022

**Article History**
Accepted : 01 June 2022
Published : 15 June 2022

**सारांशः** - सच्चिदानन्दमयपरब्रह्मणोंऽशसम्भूतत्वेन मानव आत्मनोऽस्तित्वं चिरं वाञ्छति। परन्तु यद्यपि जातस्य हि ध्रुवो मृत्युस्तथापि मानवः यावज्जीवति तावत्पर्यन्तं सुखेन सुस्थभावेन च जीवितुं यतेत। शरीरस्य सुस्थतायै उपयुक्तश्वासप्रश्वासवायुः शुद्धं जलं परिपुष्टं भोजनं चापेक्ष्यन्ते। एतानि सर्वाणि युगपदवाप्तुमेकः एतादृशः परिवेशोऽपेक्ष्यते येनास्माकं शरीरं सुस्थं तिष्ठति। अस्माकं चतुर्षु पार्श्वेषु विद्यमानाः प्राणिजातय उद्भिदश्च परिवेशशब्देन व्यवह्रियन्ते। परिवेशो दूषितश्चेत् शुद्धमन्नं शुद्धजलादिकं शुद्धश्वासप्रश्वासानुकूलोऽम्लजानसंज्ञको वायुश्च नैव सुलभाः स्युः येन मानवस्यास्तित्वमपि नश्येत्। भारतीयधर्मशास्त्रेषु प्रकृतीनामुपासना विहिता। प्रकृतिः खलु परिवेशस्य जननी। प्रकृतीनां तुष्टिद्वारा परिवेशः शान्तो मधुमयो भोगयोग्यश्च भवति, अन्यथा विनाशाय कल्प्यते। स्थालीपुकान्यायेन भारतीयधर्मशास्त्रेषु मनुस्मृतौ परिवेशसुरक्षायै शुद्धतायै च या व्यवस्था विहिता सा साम्प्रतं मया आलोच्यते।

**मूख्यशब्दाः** – मनुस्मृतौ, परिवेशः, पञ्चमहाभूतानि, पञ्चमहायज्ञाः, प्रकृतिः, वृक्षाणाम्।

धर्मशास्त्रसाहित्ये स्मृतिसाहित्यं प्राचीनतमम्। तत्रापि सर्वासु स्मृतिषु मनुस्मृतिः प्राचीनतमा इत्यत्र नास्ति विप्रतिपत्तिः। तस्यां मनुस्मृतौ परिवेशसुरक्षार्थं पञ्चमहाभूतानां पृथिव्यप्तेजवाय्वाकाशानां सृष्टिरुपासना च विहिता। स्वयमेव परमात्मा जगतोऽन्धकारं दूरीकृत्य महाभूतानि प्रादुश्चकारेति भगवता [i]मनुना प्रतिपादितम्। यथोक्तं तेन–

**ततः स्वयम्भूर्भगवानव्यक्तं व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।। इति।।**

एतानि पञ्चमहाभूतानि सृष्टेरारम्भकालादेव लोकानामुपकारकत्वेन प्रकृतिरूपेण पूजितानि भवन्ति। आकाशमवकाशं ददाति, वायुः जीवनार्थं श्वासानुकूलमम्लजानं, तेजः प्रकाशार्थं पाकार्थञ्च पक्तिं ददाति, जलं शस्योत्पत्तये जीवनार्थञ्च रसं, पृथिवी वासार्थं स्थानं ददाति, येन सर्वे प्राणिनः जीवितुं शक्नुवन्ति। अतः परमात्मा महदादितत्त्वानि क्रमशः शब्दगुणकमाकाशं, ततः स्पर्शमन्तं वायुं, ततो जगत्प्रकाशकं तेजः, ततश्च रसवतीः आपः ततश्च सर्वसहां मातृकल्पां गन्धवतीं पृथिवीं ससर्ज। उक्तं [ii]मनुना यथा–

**मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया।**
**आकाशं जायते तस्मात्तस्य शब्दगुणं विदुः।।**
**आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः।**
**बलवान् जायते वायुः स वै स्पर्शगुणो मतः।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**बायोरपि कुर्वाणाद्विरोचिष्णुस्तमोनुदम्।**

**ज्योतिरुत्पद्यते भास्वत् तद्रूपगुणमुच्यते।।**

**ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः।**

**अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः।। इति।।**

एतेषु पञ्चमहाभूतेषु जलवाय्व्योः शुद्धता, आवश्यकानुसारमुपलब्धिश्च प्राणिनां सञ्जीवनार्थं कल्प्यते। तेषां प्राणिनां जरायुजाण्डज-स्वेदज-उद्भिज्जभेदेन मनुना यत् चातुर्विध्यं परिकल्पितं तेषां मध्ये परस्परोपकारत्वमपि कल्पितम्। जरायुजादयः उद्भिज्जानाम् उद्भिजाश्च जरायुजानामुपकारकाः भवन्ति। यदि जलं प्रदूषितं यदि वा वायुः प्रदूषितः तर्हि परिवेशो दूषितो भवति येन प्राणिनां जीवनं सङ्कटापन्नं भवति। अतः प्राचीना ऋषयः जलवायुवृक्षलतादीनां प्रकृतिरूपाणां परिवेशभूतानां तत्वानां यथा प्रकोपो न स्यात्तदर्थं शान्तिसूक्तानि परिकल्पितवन्तः। ओं द्यौः शान्तिः अन्तरिक्षं शान्तिः पृथिवी शान्तिः। आपः शान्तिः औषधयः शान्तिः बनस्पतयः शान्तिः शान्तिरेव शान्तिः इत्यादि। एतावता सूक्तपाठेन परिवेशस्य शान्तिः भारसाम्यञ्च स्थाप्यते। भगवता [iii]मनुना गृहस्थस्य कृते पञ्चमहायज्ञानुष्ठानमनिवार्यत्वेन विहितम्। ते च यज्ञा यथा-

**अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च।**

**ब्राह्म्यं हुतं प्राशितञ्च पञ्चयज्ञान् प्रचक्षते।। इति।।**

एतेषां मध्येऽहुतं ब्रह्मयज्ञः हुतं देवयज्ञः प्रहुतं भूतयज्ञः ब्राह्म्यं हुतमतिथियज्ञः प्राशितञ्च पितृयज्ञः इत्यादिरूपेणापि व्यापदिश्यन्ते। तेषु च हवनरूपो यो देवयज्ञस्तस्य महत्प्राधान्यं विद्यते। यतो हि सायंप्रातः हवनद्वारा होमकुण्डादुत्थितो धूम आकाशं प्राप्य वृष्टिं कारयति, येन जललाभेन अन्नं सम्भवति ततश्च प्राणिनो जीवितुमर्हन्ति। प्रसङ्गेऽस्मिन् [iv]मनुनोक्तं यथा-

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**

**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।। इति।।**

अनेन प्रकारेण प्राणिनां जीवनधारणार्थं मन्वादिमहर्षिभिः सरल उपायाः समुद्भाविताः येन जगदिदं कल्याणाय कल्प्यते स्म। संप्रति तादृशानां नियमानामपालनेन प्रकृतिः कुपिता भवति। परिवेशः प्रदूषितो भवति जनजीवनञ्च विपर्यस्तं भवति। परिवेशोऽयं यथा प्रदूषितो न स्यात् तदर्थं प्राचीनैः मन्वादिमहर्षिभिरपि व्यवस्था अकारि। तत्रादौ जलप्रदूषणानिषेधार्थं "नाप्सु मूत्रं पुरीषं वा" इत्यादिवचनेन [v]मनुना जले मलमूत्रोत्सर्जनस्य निषेधः कृतः। "वस्त्रपूतं जलं पिवेदि"त्यादिनापि तेन शुद्धजलस्य पानं सर्वथा विधेयमिति [vi]मनुना प्रत्यपादि। वायोरपि प्रदूषणं यथा न स्यात् तदर्थं महायन्त्रप्रभृतीनां प्रवर्त्तनं, सर्वेष्वाकरेष्वधिकारः औषधीनां हिंसा, इन्धनार्थं द्रुमश्च्छेद इत्यादीनामेकैकश उपपातकत्वेन गणनात् तदर्थञ्च प्रायश्चित्तस्मरणात् तेषां कर्मणां निषेधोऽपि कृतः। यथोक्तं [vii]मनुना-

**सर्वाकटेष्वधीकारो महायन्त्रप्रवर्तनम्।**

**इन्धनार्थमशुष्काणां द्रुमाणामवपातम्।। इति।।**

विशुद्धवायुः योऽम्लजानसंज्ञकः प्राणिनां श्वासप्रश्वासानुकूलो भवति स वृक्षादिभ्यः प्राप्यते। अत एव वृक्षाः मनुष्याणां जीवनधारणस्योपायभूता इत्यत्र नास्ति संशयः। यथा प्राणिनः वृक्षाणामभावे जीवितुं न शक्नुवन्ति तथा स्थावरा वृक्षा अपि जङ्गमात्मकानां प्राणिनामभावे जीवितुं नार्हन्ति। अतः सर्वात्मनेश्वरेण स्थावरजङ्गमात्मकाः प्राणिनः परस्परं निर्भरशीला सन्तः सृष्टाः। अतो मानवा विशेषेण वृक्षाणां रोपणं रक्षणं च कुर्युरन्यथा तेषामेव रक्षणं न स्यात्। न केवलं

वृक्षा अम्लजानाख्यपवनदानेन मानवानुपकुर्वन्ति स्निग्धच्छायथा देवार्चनार्थं पुष्पादिभिः भोजनार्थं फलादिभिः पाकार्थं गृहोपकरणार्थं कृष्युपकरणार्थं च काष्ठौः, रोगनिराकरणार्थं मूलफलपत्ररसादिभिः परिधानार्थं पुष्पैः बल्कलादिभिश्च यज्ञानुष्ठानार्थमिध्मसमित्सृक्स्रुवादिभि–श्चोपकुर्वन्ति, उद्यानरूपेण आनन्दं जनयन्ति। अतो मनुष्याः तान् वृक्षादीन् विना न कथमपि स्थातुमर्हन्ति। मनुष्याणां संख्या यथा यथा वर्द्धते तथा तथा वृक्षाणां संख्या यदि न बर्द्धते तर्हि परिवेशस्य भारसाम्यं न स्यात्। तस्मात् जगत्कल्याणाय मन्वादिमहर्षिभिः वृक्षाणां रोपणमुद्दिश्य तेषां च्छेदेन प्रायश्चित्तविधानात् प्रकारान्तरेण तस्य निषेधः कृतः। अत एवोक्तं [viii]मनुना–

**फलदानं तु वृक्षाणां च्छेदने जप्यमृकशतम्।**

**गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरूधाम्।।**

**पुनश्च- इन्धनार्थशुष्काणां द्रुमाणामवपातनमिति।। इति।।**

एतेन कर्मणा न केवलं पापभागिनो भवन्ति जनाः अपि तु राज्ञा दण्ड्या एव भवन्ति। प्रसङ्गेऽस्मिन् प्रतिपादितं [ix]मनुना यत्–

**वनस्पतीनां सर्वेषामुपभोगो यथा यथा।**

**तथा तथा दमः कार्यो हिंसायामिति धारणा।। इति।।**

दण्डस्य परिमाणोऽपि विष्णुस्मृतौ स्पष्टो भवति यथा– फलोपभोगात् द्रुमश्च्छेदी तूत्तमसाहसम्, पुष्पोपभोगद्रुमश्च्छेदी मध्यमं, बल्लीगुल्मलताच्छेदी कार्षापणशतं, तृणच्छेदी कार्षापणमेकं दण्डरूपेण लभत एव प्रसङ्गेऽस्मिन् [x]याज्ञवल्क्येनापि प्रतिपादितं यत्–

**प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे।**

**उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणो दमः।।**

**चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये।**

**जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते।।**

**गुल्म-गुच्छ-क्षुपलताप्रतानौषधिवीरुधाम्।**

**पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्त्तने।। इति।।**

प्रकारान्तरेण वृक्षादिरोपयितुः पुण्यप्राप्तिः नरकनिवृत्तिश्च धर्मशास्त्रे बहुषु ग्रन्थेषु प्रतिपादितम्। तत्र वङ्गीयनिबन्धकारेण रघुनन्दनभट्टाचार्येण प्रसङ्गेऽस्मिन् तिथितत्त्वे प्रतिपादितं यत्–

**अश्वत्थ एकः पिचुमर्द एको द्वौ चम्पकौ त्रीणि च केशराणि।**

**सप्ताथ ताला नवनारिकेला पञ्चाम्रप्ररोपी नरकं न याति।। इति।।**

एतदतिरिक्तं तुलसीवराश्वत्थवृक्षाणामपि पूजा शास्त्रे लोके च दृश्यते। वराश्वत्थयोर्विवाहोऽपि जनैः भक्त्या क्रियते। आधुनिका वैज्ञानिका अपि वृक्षाणां वृष्टिकारकत्वेनोपयोगितां प्रदर्शयन्ति। तेषां मते वृक्षशून्यो देशोऽचिरादेव मरुभूमित्वमापद्यते इति। अनेन ज्ञायते यत् वृक्षाणां स्थितिः परिवेशसुरक्षायै प्रदूषणनिवृत्त्यै च कल्प्यते।

पुनश्च मनुना ब्रह्मयज्ञानुष्ठानप्रसङ्गे वेदमन्त्राणामुच्चारणं प्रत्यहं कर्त्तव्यमिति यत् प्रत्यपादि तेन ओंकारसहितेन वेदमन्त्रोच्चारणेन शब्दप्रदूषणमपि निवर्त्तते। सम्प्रति मृत्तररेलयानादीनां प्राचुर्येण गमनागमनद्वारा समुत्थिताः कलुषिताः धूमाः परिवेशं दूषयन्ति। तस्मात् निवृत्यर्थं प्रकृतेः भारसाम्यञ्च स्थापयितुं वृक्षादिरोपणेन सह घृतेन हवनादिकं प्रत्यहं

कार्यम्। मानवाः स्वार्थसिद्धये प्रकृतेर्दुरुपयोगेन परिवेशं कलुषी कुर्वन्ति। तत्र समीचीनम्, "वसुधैव कुटुम्वकं", "सर्वे भवन्तु सुखिनः" इत्यादि सूक्तयोऽस्माभिः परिपालनीयाः। परिवेशस्य तदेव लक्ष्यम्। परिवेशभूता प्रकृतिर्यथाऽस्मान् उपकरोति तथास्माभिरपि किञ्चित् स्वार्थं परित्यज्य त्यागमनोभावेन प्रकृतेः सेवा कार्या येन परिवेशस्य भारसाम्यं सुरक्षा च भवति। अतो मनूपदिष्टेन मार्गेण यदि मानवः परिचालितः स्यात् तर्हि परिवेशः प्रदूषणमुक्तो भूत्वा सुरक्षितो भविष्यतीति शम्।

**टिप्पणी-**

---

[i]. मनुस्मृतिः - 1/6

[ii]. मनुस्मृतिः – 1/75-78

[iii]. मनुस्मृतिः - 3/74

[iv]. मनुस्मृतिः – 3/76

[v]. मनुस्मृतिः – 4/56

[vi]. मनुस्मृतिः -6/46

[vii]. मनुस्मृतिः -11/63-64

[viii]. मनुस्मृतिः – 11/142, 11/64

[ix]. मनुस्मृतिः – 8/285

[x]. याज्ञवल्क्यस्मृतिः, व्यवहाराध्यायः -227-229

**सन्दर्भग्रन्थसूची-**

मनुस्मृतिः –मन्वर्थमुक्तावलीसहिता, मोतिलाल वनारसीदास, दिल्ली, 1990

याज्ञवल्क्यस्मृतिः –मिताक्षराटीकासहिता,डा.गङ्गासागरराय सम्पादित,चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।